॥ श्रीः ॥

# ॥ साम्बाष्टकम् ॥

सन्तः पुत्राः सुहृद उत वा सत्कळत्रं सुगेहं
वित्ताधीशप्रतिमवसुमान् बोभवीतु प्रकामम् ।
आशास्वास्ताममृतकिरणस्पर्धिकीर्तिच्छटा वा
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ १

वादे सर्वानपि विजयतां सत्सभायां नृपाग्रे
भोगान् सर्वाननुभवतु वा दैवतैरप्यलभ्यान् ।
भूमौ नीरे वियति चरितुं वर्ततां योगशक्तिः
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ २

रूपं वास्तां कुसुमविशिखाखर्वगर्वापहारि
शौर्यं वास्ताममरपतिसंक्षोभदक्षं नितान्तम् ।
पृथ्वीपालप्रवरमकुटाघट्टनं स्यात्पदे वा
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ ३

गेहे सन्तु प्रवरभिषजस्सर्वरोगापनोदाः
देशे देशे बहुधनयुता बन्धवस्सन्तु कामम् ।
सर्वे लोका अपि वचनतो दासवत्कर्म कुर्युः
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ ४

अध्यास्तां वा सुमणिखचितं दिव्यपारीणपीठं
हस्त्यश्वाद्यैरपि परिवृतो द्वारदेशोऽस्तु कामम् ।
भूष्यन्तां वाभरणनिवहैरङ्गकान्यर्घशून्यैः
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ ५

धत्तां मूर्ध्निप्रवरमणिभिर्जुष्टदीव्यत्किरीटं
वस्तां देहं विविधवसनैर्हेमसूत्रावबद्धैः ।
आरुह्यासौ विचरतु भुवं तिर्यगान्दोलिकां वा
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ ६

सर्वाशान्तप्रकटितरवैर्वन्दिभिः स्तूयतां वा
भेरीढक्काप्रमुखबिरुदं दिक्षु दन्ध्वन्यतां वा ।
पृथ्वीं सर्वामवतु रिपुभिः क्रान्तपादाग्रपीठः
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ ७

हृद्यां पद्यावलिमपि करोत्वर्थचित्रं सुकाव्यं
षट्छास्त्रेष्वप्यमितधिषणो ग्रन्थसन्दोहकर्ता ।
सर्वेषां स्यादमितहृदयानन्ददो वाङ्मुखैर्वा
सर्वं व्यर्थं मरणसमये साम्ब एकः सहायः ॥ ८

इति श्रीचन्द्रशेखरभारतीमहास्वामिविरचितं साम्बाष्टकं सम्पूर्णम् ॥

